# श्रीचक्रलक्ष्मी स्तोत्रम्

सिद्धिलक्ष्म्यै बुद्धिलक्ष्म्यै वरलक्ष्म्यै नमो नमः ।

नमस्ते सौभाग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १ ॥

वचोलक्ष्म्यै काव्यलक्ष्म्यै गानलक्ष्म्यै नमो नमः ।

नमस्ते शृङ्गारलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २ ॥

धनलक्ष्म्यै धान्यलक्ष्म्यै धरालक्ष्म्यै नमो नमः ।

नमस्तेऽष्टैश्वर्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ३ ॥

गृहलक्ष्म्यै ग्रामलक्ष्म्यै राज्यलक्ष्म्यै नमो नमः ।

नमस्ते साम्राज्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ४ ॥

शान्तिलक्ष्म्यै दान्तिलक्ष्म्यै क्षान्तिलक्ष्म्यै नमो नमः ।

नमोऽस्त्वात्मानन्दलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ५ ॥

सत्यलक्ष्म्यै दयालक्ष्म्यै सौख्यलक्ष्म्यै नमो नमः ।

नमः पातिव्रत्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ६ ॥

गजलक्ष्म्यै राजलक्ष्म्यै तेजोलक्ष्म्यै नमो नमः ।

नमः सर्वोत्कर्षलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ७ ॥

सत्त्वलक्ष्म्यै तत्त्वलक्ष्म्यै बोधलक्ष्म्यै नमो नमः ।

नमस्ते विज्ञानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ८ ॥

स्थैर्यलक्ष्म्यै वीर्यलक्ष्म्यै धैर्यलक्ष्म्यै नमो नमः ।

नमस्तेऽस्त्वौदार्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ९ ॥

सिद्धिलक्ष्म्यै ऋद्धिलक्ष्म्यै विद्यालक्ष्म्यै नमो नमः ।

नमस्ते वैराग्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १० ॥

कीर्तिलक्ष्म्यै मूर्तिलक्ष्म्यै वर्चोलक्ष्म्यै नमो नमः ।

नमस्ते त्वनन्तलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ ११ ॥

जपलक्ष्म्यै तपोलक्ष्म्यै व्रतलक्ष्म्यै नमो नमः ।

नमस्ते कल्याणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १२ ॥

मन्त्रलक्ष्म्यै तन्त्रलक्ष्म्यै यन्त्रलक्ष्म्यै नमो नमः ।

नमो गुरुकृपालक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १३ ॥

सभालक्ष्म्यै प्रभालक्ष्म्यै कलालक्ष्म्यै नमो नमः ।

नमस्ते लावण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १४ ॥

वेदलक्ष्म्यै नादलक्ष्म्यै शास्त्रलक्ष्म्यै नमो नमः ।
नमस्ते वेदान्तलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १५ ॥
क्षेत्रलक्ष्म्यै तीर्थलक्ष्म्यै वेदिलक्ष्म्यै नमो नमः ।
नमस्ते सन्तानलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १६ ॥
योगलक्ष्म्यै भोगलक्ष्म्यै यज्ञलक्ष्म्यै नमो नमः ।
क्षीरार्णवपुण्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १७ ॥
अन्नलक्ष्म्यै मनोलक्ष्म्यै प्रज्ञालक्ष्म्यै नमो नमः ।
विष्णुवक्षोभूषलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १८ ॥
धर्मलक्ष्म्यै अर्थलक्ष्म्यै कामलक्ष्म्यै नमो नमः ।
नमस्ते निर्वाणलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ १९ ॥
पुण्यलक्ष्म्यै क्षेमलक्ष्म्यै श्रद्धालक्ष्म्यै नमो नमः ।
नमस्ते चैतन्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २० ॥
भूलक्ष्म्यै ते भुवर्लक्ष्म्यै सुवर्लक्ष्म्यै नमो नमः ।
नमस्ते त्रैलोक्यलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २१ ॥
सुधालक्ष्म्यै जनलक्ष्म्यै हर्षलक्ष्म्यै नमो नमः ।

नमः कमललक्ष्म्यै च महालक्ष्म्यै नमो नमः ॥ २२ ॥
भावलक्ष्म्यै वृद्धिलक्ष्म्यै भव्यलक्ष्म्यै नमो नमः ।
नमस्ते वैकुण्ठलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २३ ॥
नित्यलक्ष्म्यै सत्यलक्ष्म्यै वंशलक्ष्म्यै नमो नमः ।
नमस्ते कैलासलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २४ ॥
प्रकृतिलक्ष्म्यै श्रीलक्ष्म्यै स्वस्तिलक्ष्म्यै नमो नमः ।
नमस्ते गोलोकलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २५ ॥
शक्तिलक्ष्म्यै भक्तिलक्ष्म्यै मुक्तिलक्ष्म्यै नमो नमः ।
नमस्ते त्रिमूर्तिलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २६ ॥
नमस्ते श्रीचक्रलक्ष्म्यै आदिलक्ष्म्यै नमो नमः ।
नमो ब्रह्मानन्दलक्ष्म्यै महालक्ष्म्यै नमो नमः ॥ २७ ॥

॥ इति सौभाग्यलक्ष्मीकल्पोक्त श्रीचक्रलक्ष्मी स्तोत्रम् ॥

**śrīcakralakṣmī stotram**

siddhilakṣmyai buddhilakṣmyai varalakṣmyai namo namaḥ |
namaste saubhāgyalakṣmyai mahālakṣmyai namo namaḥ || 1 ||
vacolakṣmyai kāvyalakṣmyai gānalakṣmyai namo namaḥ |
namaste śṛṅgāralakṣmyai mahālakṣmyai namo namaḥ || 2 ||
dhanalakṣmyai dhānyalakṣmyai dharālakṣmyai namo namaḥ |
namaste.aṣṭaiśvaryalakṣmyai mahālakṣmyai namo namaḥ || 3 ||
gṛhalakṣmyai grāmalakṣmyai rājyalakṣmyai namo namaḥ |
namaste sāmrājyalakṣmyai mahālakṣmyai namo namaḥ || 4 ||
śāntilakṣmyai dāntilakṣmyai kṣāntilakṣmyai namo namaḥ |
namo.astvātmānandalakṣmyai mahālakṣmyai namo namaḥ || 5 ||
satyalakṣmyai dayālakṣmyai saukhyalakṣmyai namo namaḥ |
namaḥ pātrivratyalakṣmyai mahālakṣmyai namo namaḥ || 6 ||
gajalakṣmyai rājalakṣmyai tejolakṣmyai namo namaḥ |
namaḥ sarvotkarṣalakṣmyai mahālakṣmyai namo namaḥ || 7 ||
sattvalakṣmyai tattvalakṣmyai bodhalakṣmyai namo namaḥ |
namaste vij¤ānalakṣmyai mahālakṣmyai namo namaḥ || 8 ||
sthairyalakṣmyai vīryalakṣmyai dhairyalakṣmyai namo namaḥ |
namaste.astvaudāryalakṣmyai mahālakṣmyai namo namaḥ || 9 ||

siddhilakṣmyai ṛddhilakṣmyai vidyālakṣmyai namo namaḥ |
namaste vairāgyalakṣmyai mahālakṣmyai namo namaḥ || 10 ||
kīrtilakṣmyai mūrtilakṣmyai varcolakṣmyai namo namaḥ |
namaste tvanantalakṣmyai mahālakṣmyai namo namaḥ || 11 ||
japalakṣmyai tapolakṣmyai vratalakṣmyai namo namaḥ |
namaste kalyāṇalakṣmyai mahālakṣmyai namo namaḥ || 12 ||
mantralakṣmyai tantralakṣmyai yantralakṣmyai namo namaḥ |
namo gurukṛpālakṣmyai mahālakṣmyai namo namaḥ || 13 ||
sabhālakṣmyai prabhālakṣmyai kalālakṣmyai namo namaḥ |
namaste lāvaṇyalakṣmyai mahālakṣmyai namo namaḥ || 14 ||
vedalakṣmyai nādalakṣmyai śāstralakṣmyai namo namaḥ |
namaste vedāntalakṣmyai mahālakṣmyai namo namaḥ || 15 ||
kṣetralakṣmyai tīrthalakṣmyai vedilakṣmyai namo namaḥ |
namaste santānalakṣmyai mahālakṣmyai namo namaḥ || 16 ||
yogalakṣmyai bhogalakṣmyai yaj¤alakṣmyai namo namaḥ |
kṣīrārṇavapuṇyalakṣmyai mahālakṣmyai namo namaḥ || 17 ||
annalakṣmyai manolakṣmyai praj¤ālakṣmyai namo namaḥ |
viṣṇuvakṣobhūṣalakṣmyai mahālakṣmyai namo namaḥ || 18 ||
dharmalakṣmyai arthalakṣmyai kāmalakṣmyai namo namaḥ |
namaste nirvāṇalakṣmyai mahālakṣmyai namo namaḥ || 19 ||

puṇyalakṣmyai kṣemalakṣmyai śraddhālakṣmyai namo namaḥ |
namaste caitanyalakṣmyai mahālakṣmyai namo namaḥ || 20 ||
bhūlakṣmyai te bhuvarlakṣmyai suvarlakṣmyai namo namaḥ |
namaste trailokyalakṣmyai mahālakṣmyai namo namaḥ || 21 ||
sudhālakṣmyai janalakṣmyai harṣalakṣmyai namo namaḥ |
namaḥ kamalalakṣmyai ca mahālakṣmyai namo namaḥ || 22 ||
bhāvalakṣmyai vṛddhilakṣmyai bhavyalakṣmyai namo namaḥ |
namaste vaikuṇṭhalakṣmyai mahālakṣmyai namo namaḥ || 23 ||
nityalakṣmyai satyalakṣmyai vaṃśalakṣmyai namo namaḥ |
namaste kailāsalakṣmyai mahālakṣmyai namo namaḥ || 24 ||
prakṛtilakṣmyai śrīlakṣmyai svastilakṣmyai namo namaḥ |
namaste golokalakṣmyai mahālakṣmyai namo namaḥ || 25 ||
śaktilakṣmyai bhaktilakṣmyai muktilakṣmyai namo namaḥ |
namaste trimūrtilakṣmyai mahālakṣmyai namo namaḥ || 26 ||
namaste śrīcakralakṣmyai ādilakṣmyai namo namaḥ |
namo brahmānandalakṣmyai mahālakṣmyai namo namaḥ || 27 ||

|| iti saubhāgyalakṣmīkalpokta śrīcakralakṣmī stotram ||

www.kamakotimandali.com